# પ્રેમેન્દુસાગરસ્તોત્રમ્

Premendusagarastotram

sanskritdocuments.org

February 23, 2019

# Premendusagarastotram

# પ્રેમેન્દુસાગરસ્તોત્રમ્

## Sanskrit Document Information

Text title : premendusAgarastotram

File name : premendusAgarastotram.itx

Category : vishhnu, krishna, rUpagosvAmin, stavamAlA, aShTottarashatanAma

Location : doc_vishhnu

Author : Rupagoswami

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Description/comments : From stavamAlA (rUpagosvAmivirachitA) Garland of Devotional Prayers stavamAlA

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : February 22, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

February 23, 2019

*sanskritdocuments.org*

# પ્રેમેન્દુસાગરસ્તોત્રમ્

શ્રીપ્રેમેન્દુસાગરસંજ્ઞકશ્રીકૃષ્ણાષ્ટોત્તરશતનામમાલિકા ।
કલહાન્તરિતાવૃત્તા કાચિદ્ વલ્લવસુન્દરી ।
વિરહોત્તાપખિન્નાઙ્ગી સખીં સોત્કણ્ઠમબ્રવીત્ ॥ ૧॥

હન્ત ગૌરિ સ કિં ગન્તા પન્થાનં મમ નેત્રયોઃ ।
શ્રીકૃષ્ણઃ કરુણાસિન્ધુઃ કૃષ્ણો ગોકુલવલ્લભઃ ॥ ૨॥

ગોવિન્દઃ પરમાનન્દો નન્દમન્દિરમઙ્ગલમ્ ।
યશોદાખનિમાણિક્યં ગોપેન્દ્રામ્ભોધિચન્દ્રમાઃ ॥ ૩॥

નવામ્ભોધરસંરમ્ભવિડમ્બિરુચિડમ્બરઃ ।
ક્ષિપ્તહાટકશૌટીર્યપટ્ટપીતામ્બરાવૃતઃ ॥ ૪॥

કન્દર્પરૂપસન્દર્પહારિપાદનખદ્યુતિઃ ।
ધ્વજામ્ભોરુહદમ્ભોલિ યવાઙ્કુશલસત્પદઃ ॥ ૫॥

પદપઞ્જરસિઞ્જાનમઞ્જુમઞ્જીરખઞ્જનઃ ।
મસારસમ્પુટાકારધારિ જાનુયુગોજ્જ્વલઃ ॥ ૬॥

શૌણ્ડસ્તમ્બેરમોદ્દણ્ડશુણ્ડારમ્યોરુસૌષ્ઠવઃ ।
મણિકિઙ્કિણિસઙ્કીર્ણવિશઙ્કટકટિસ્થલઃ ॥ ૭॥

મધ્યમાધુર્યવિધ્વસ્તદિવ્યસિંહમદોદ્ધતિઃ ।
ગારુત્મતગિરિગ્રાવગરિષ્ઠોરસ્તટાન્તરઃ ॥ ૮॥

કમ્બુકણ્ઠસ્થલાલમ્બિમણિસમ્રાડ્ અલઙ્કૃતિઃ ।
આખણ્ડલમણિસ્તમ્ભસ્પર્ધિદોર્દણ્ડચણ્ડિમા ॥ ૯॥

ખણ્ડિતાખણ્ડકોટીન્દુસૌન્દર્યમુખમણ્ડલઃ ।
લાવણ્યલહરીસિન્ધુઃ સિન્દૂરતુલિતાધરઃ ॥ ૧૦॥

ફુલ્લારવિન્દસૌન્દર્ય કન્દલીતુન્દિલેક્ષણઃ ।

ગણ્ડાન્તતાણ્ડવક્રીડાહિણ્ડન્મકરકુણ્ડલઃ ॥ ૧૧॥

નવીનયૌવનારમ્ભજૃમ્ભિતોજ્જ્વલવિગ્રહઃ ।
અપાઙ્ગતુઙ્ગિતાનઙ્ગકોટિકોદણ્ડવિક્રમઃ ॥ ૧૨॥

સુધાનિર્યાસમાધુર્યધુરીણોદારભાષિતઃ ।
સાન્દ્રવૃન્દાટવીકુઞ્જકન્દરાગન્ધસિન્ધુરઃ ॥ ૧૩॥

ધન્યગોવર્ધનોત્તુઙ્ગશૃઙ્ગોત્સઙ્ગનવામ્બુધઃ ।
કલિન્દનન્દિનીકેલિકલ્યાણકલહંસકઃ ॥ ૧૪॥

નન્દીશ્વરધૃતાનન્દો ભાણ્ડીરતટતાણ્ડવી ।
શઙ્ખચૂડહરઃ ક્રીદાગેણ્ડૂકૃતગિરીશ્વરઃ ॥ ૧૫॥

વારીન્દ્રાર્બુધગમ્ભીરઃ પારીન્દ્રાર્બુદવિક્રમી ।
રોહિણીનન્દનાનન્દી શ્રીદામોદ્દામસૌહૃદઃ ॥ ૧૬॥

સુબલપ્રેમદયિતઃ સુહૃદાં હૃદયઙ્ગમઃ ।
નન્દવ્રજજનાનન્દસન્દીપનમહાવ્રતી ॥ ૧૭॥

શૃઙ્ગિનીસઙ્ઘસઙ્ગ્રાહિવેણુસઙ્ગીતમણ્ડલઃ ।
ઉત્તુઙ્ગપુઙ્ગવારબ્ધસઙ્ગરાસઙ્ગકૌતુકી ॥ ૧૮॥

વિસ્ફુરદ્વન્યશૃઙ્ગારઃ શૃઙ્ગારાભીષ્ટદૈવતમ્ ।
ઉદઞ્ચત્પિઞ્છવિઞ્છોલીલાઞ્છિતોજ્જ્વલવિગ્રહઃ ॥ ૧૯॥

સઞ્ચરચ્ચઞ્ચરીકાલિપઞ્ચવર્ણસ્રગઞ્ચિતઃ ।
સુરઙ્ગરઙ્ગણસ્વર્ણયૂથિગ્રથિતમેખલઃ ॥ ૨૦॥

ધાતુચિત્રવિચિત્રાઙ્ગલાવણ્યલહરીભરઃ ।
ગુઞ્જાપુઞ્જકૃતાકલ્પઃ કેલિતલ્પિતપલ્લવઃ ॥ ૨૧॥

વપુરામોદમાધ્વીકવર્ધિતપ્રમદામદઃ ।
વૃન્દાવનારવિન્દાક્ષીવૃન્દકન્દર્પદીપનઃ ॥ ૨૨॥

મીનાઙ્કુસઙ્કુલાભીરીકુચકુઙ્કુમપઙ્કિલઃ ।
મુખેન્દુમાધુરીધારારુદ્ધસાધ્વીવિલોચનઃ ॥ ૨૩॥

કુમારીપટલુણ્ઠાકઃ પ્રૌઢનર્મોક્તિકર્મઠઃ ।
અમન્દમુગ્ધવૈદગ્ધીદિગ્ધરાધાસુધામ્બુધિ ॥ ૨૪॥

ચારુચન્દ્રાવલીબુદ્ધિકૌમુદીશરદાગમઃ ।
ધીરલાલિત્યલક્ષ્મીવાન્ કન્દર્પાનન્દબન્ધુરઃ ॥ ૨૫॥

ચન્દ્રાવલીચકોરેન્દ્રો રાધિકામાધવીમધુઃ ।
લલિતાકેલિલલિતો વિશાખોડુનિશાકરઃ ॥ ૨૬॥

પદ્માવદનપદ્માલિઃ શૈવ્યાસેવ્યપદામ્બુજઃ ।
ભદ્રાહૃદયનિદ્રાલુઃ શ્યામલાકામલાલસઃ ॥ ૨૭॥

લોકોત્તરચમત્કારલીલામઞ્જરિનિષ્કુટઃ ।
પ્રેમસમ્પદયસ્કાન્તકાન્તકૃતકૃષ્ણાયસવ્રતઃ ॥ ૨૮॥

મુરલીચૌરગૌરાઙ્ગીકુચકઞ્ચુકલુઞ્ચનઃ ।
રાધાભિસારસર્વસ્વઃ સ્ફારનાગરતાગુરુઃ ॥ ૨૯॥

રાધાનર્મોક્તિશુશ્રૂષાવીરુન્નીરુદ્ધવિગ્રહઃ ।
કદમ્બમઞ્જરીહારિરાધિકારોધનોદ્ધુરઃ ॥ ૩૦॥

કુડુઙ્ગક્રોડસઙ્ગૂઢરાધાસઙ્ગમરઙ્ગવાન્ ।
ક્રીડોડ્ડામરધીરાધાતાડઙ્કોત્પલતાડિતઃ ॥ ૩૧॥

અનઙ્ગસઙ્ગરોદ્દામરિક્ષુણ્ણકુઙ્કુમકઙ્કુટઃ ।
ત્રિભઙ્ગિલઙ્ગિમાકારો વેણુસઙ્ગમિતાધરઃ ॥ ૩૨॥

વેણુવિસ્તૃતગાન્ધર્વસારસન્દર્ભસૌષ્ઠવઃ ।
ગોપીયૂથસહસ્રેન્દ્રઃ સાન્દ્રરાસરસોન્મદઃ ॥ ૩૩॥

સ્મરપઞ્ચશરીકોટિક્ષોભકારિદૃગઞ્ચલઃ ।
ચણ્ડાંશુનન્દિનીતીરમણ્ડલારબ્ધતાણ્ડવઃ ॥ ૩૪॥

વૃષભાનુસુતાભૃઙ્ગીકામધુક્કમલાકરઃ ।
ગૂઢાકૂતપરીહાસરાધિકાજનિતસ્મિતઃ ॥ ૩૫॥

નારીવેશનિગૂઢાત્મા વ્યૂઢચિત્તચમત્કૃતિઃ ।
કર્પૂરાલમ્બિતામ્બૂલકરમ્બિતમુખામ્બુજઃ ॥ ૩૬॥

માનિચન્દ્રાવલીદૂતીક્લૃપ્તસન્ધાનકૌશલઃ ।
છદ્મઘટ્ટતટીરુદ્ધરાધાભ્રૂકુટિઘટ્ટિતઃ ॥ ૩૭॥

દક્ષરાધાસખીહાસવ્યાજોપાલમ્ભલજ્જિતઃ ।
મૂર્તિમદ્વલ્લવીપ્રેમા ક્ષેમાનન્દરસાકૃતિઃ ॥ ૩૮॥

અભિસારોલ્લસદ્ભદ્રાકિઙ્કિણીનિનદોન્મુખઃ ।
વાસસજ્જીભવત્પદ્માપ્રેક્ષ્યમાણાગ્રપદ્ધતિઃ ॥ ૩૯॥

ઉત્કણ્ઠિતાર્તલલિતાવિતર્કપદવીં ગતઃ ।
વિપ્રલબ્ધવિશાખોરુવિલાપભરવર્ધનઃ ॥ ૪૦॥

કલહાન્તરિતાશ્યામામૃગ્યમાણમુખેક્ષણઃ ।
ખણ્ડિતોચ્ચણ્ડધીશૈવ્યારોષોક્તિરસિકાન્તરઃ ॥ ૪૧॥

વિશ્લેષવિક્લવચ્ચન્દ્રાવલીસન્દેશનન્દિતઃ ।
સ્વાધીનભર્તૃકોત્ફુલ્લરાધામણ્ડનપણ્ડિતઃ ॥ ૪૨॥

ચુમ્બવેણુગ્લહદ્યુતિજયિરાધાધૃતાઞ્ચલઃ ।
રાધાપ્રેમરસાવર્તવિભ્રમભ્રમિતાન્તરઃ ॥ ૪૩॥

ઇત્યેષોન્મત્તધીઃ પ્રેમ્ના શંસન્તી કંસમર્દનમ્ ।
સ્ફુરન્તં પુરતઃ પ્રેક્ષ્ય પ્રૌઢાનન્દોત્સવં યયૌ ॥ ૪૪॥

પ્રેમેન્દુસાગરાખ્યેઽસ્મિન્નામ્નામષ્ટોત્તરે શતે ।
વિગાહયન્તુ વિબુધાઃ પ્રીત્યા રસનમન્દરમ્ ॥ ૪૫॥

ઇતિ શ્રીરૂપગોસ્વામિવિરચિતસ્તવમાલાયાં પ્રેમેન્દુસાગરસ્તોત્રં
અથવા શ્રીકૃષ્ણાષ્ટોત્તરશતનામં સમ્પૂર્ણમ્ ।

*Premendusagarastotram*
pdf was typeset on February 23, 2019

Please send corrections to *sanskrit@cheerful.com*